International Journal of Sanskrit Research
अनन्ता

**ISSN: 2394-7519**
IJSR 2019; 5(1): 60-61
© 2019 IJSR
www.anantaajournal.com
Received: 22-11-2018
Accepted: 25-12-2018

**डॉ. गोपाल कुमार झा**
श्री चन्द्रशेखर झा, सिसवार,
फूलपराश, मधुबनी, बिहार, भारत

**Corresponding Author:**
**डॉ. गोपाल कुमार झा**
श्री चन्द्रशेखर झा, सिसवार,
फूलपराश, मधुबनी, बिहार, भारत

# वैदिक कर्म मीमांसा

**डॉ. गोपाल कुमार झा**

**प्रस्तावना**

अनन्ता वै वेदाः पुण्यों वै पुण्येन कर्मणा भवति। अ अनेन वेदानुवचनेन ब्रह्ममचर्येण तपसा यज्ञेन च जनाः स्वकीयं शरीर ब्रह्ममयं कुर्वन्ति तथा हि वेदाध्ययनेन- नित्य नैमितिक काम्य कर्मणामनुष्ठानेन चपरमं स्थानं प्राप्नुवन्ति। तदा जिज्ञासा भवति यत् वेदे किं तत्वं बर्तते एतास्मिन् विषये सायणेनोक्तंयत्

"इष्टप्राप्रिरनिष्टपरिहारयोरलौकिकमुपायं यो ग्रन्थों वेदयति स वेद ।।

"वेदानां परमात्मनो निःश्वास भूतत्वं प्रतिपादितं क्वचिद् वेदानां परमात्म रूपत्वमपि वर्णितमस्ति यथा हि।।

द्वे ब्रह्मणी वेदितव्ये शब्द ब्रह्मं परं च यत्।
शब्द ब्रह्मणि निष्णातः पर ब्रह्माधिगच्छति।। [1]

ब्रह्ममणों रूपद्वयमुक्तं पर ब्रह्ममात्मकमेकं रूपं शब्द ब्रह्मकात्मकञचापरं रूपं विद्यते। मनुश्यस्तु शब्द ब्रह्माणि निष्णातो भवति स एव पर ब्रह्माधिगन्तुं समर्थो भवति। शब्द ब्रह्मम रूपा एवैमे वेदासन्ति वेदेषु पर ब्रह्ममणः स्वरूपस्य यज्ञ मुरवेन वर्णनं कृतमस्ति।

यथोक्तंम्- यत्तत्वं वेद गुप्तं परम सुखतमं नित्यमुक्तस्वभावम् सत्यं सूक्ष्माति सूक्ष्मं महदिदममृतं मुक्त मात्रैक गम्यम।।

प्रपञ्चितः। शास्त्राणामाधारः मूल वेदा एव वेदात् एर्व प्रसिध्यति,

**"वेदेयथा"**

"वेदाहमेतं पुरूषं महान्तमादित्यवर्ण तमसः परस्तात्
"तमेव विदित्वा मृत्युमेति नान्यः पन्था विद्यतेऽयनाय।। [4]

विषयेऽस्मिन् मीमासायां प्रतिपादितं विद्यते वेदं तु स्वतन्त्रं प्रमाणमितरो तु वेद मूलकतया।
यथोक्तं मनुना-

"श्रुतिस्तु वेदो विज्ञेयो धर्मषास्त्रं तु वैंस्मृतिः" [5]

तथा च- वेदोऽखिलो धर्ममूलं स्मृतिशीले च तद्विदाम।

आचारश्चैव साधूनामात्मनस्तुष्टिरेव च
विषयेऽस्मिन् यथोक्तमभियुक्तैः-
वेदे काञ्चन पत्तने परिलशद्। वेदान्त दुर्गो महान्।
मीमांस परिषा विभाति पुरतः शाब्दं लशद् गोपुरम्।
योगो यामिनि जागरूक नीचयः सांख्यं विवेकात्मकम्।
धर्मञ्चोरयितुं विशान्ति सुगताः नैयायिकाः कुक्कुराः।। [6]

अस्तु वेद शास्त्रं स्वर्णमयं नगरं वर्तते। शास्त्राणामुपयोगः काञ्चनं नगरस्यवेद शास्त्रस्य रक्षणं परं कत्र्तव्यं वर्णितं वर्तते। तत्र हि वेदान्त शास्त्रं दुर्ग रूपं दुर्गमं वर्तते, यस्य ज्ञानं सर्वषां सुगमं नास्ति अतः वेदस्य रक्षार्थं सर्व प्रथमं वेदान्तशास्त्रं वर्त्तते।
वेदे ब्रह्ममणों मूल स्वरूपस्य यज्ञ मुखेन वर्णनं कृतमस्ति। सोऽयं यज्ञाः प्रजापति रूपेण प्रतिपादितमास्ति। अतो ब्रह्ममणो द्वयोरपि स्वरूपयों वेदानां शब्द ब्रह्मम रूपत्वं यज्ञानां च परब्रह्म रूपत्वं सुतरां सिध्यत्येव। यथा हि।।

“वेंदा हि यज्ञार्थमभिप्रवृताः। [2]

यज्ञः खलु लोकेऽस्मिन् साक्षार्देश्वर्य रूपं पापादि रोगाणां निवारकः परलोक स्वर्गस्य अमरत्वस्य च प्रापको विद्यते। अतोऽयं श्रेष्ठतमं कर्म रूपेण निगदितः। यथोक्तम्-

“यज्ञो वै श्रेष्ठतमं कर्म”
”यज्ञ वै श्रेष्ठतमं कर्म” [3]

समस्तानामपि कर्मणां चत्वारो भागाः सन्ति ते यथा- प्रशस्तमप्रशस्तं श्रेष्ठं श्रेष्ठतमञ्चेतिः इति महीधराचार्येण शुक्लयजुर्वेद संहितेयां प्रतिपादितम।
आस्मिन्नेव प्रकरणे नित्य नैमितिक काम्य भेदञ्च चतुर्णामपि कर्मणां समाहारः कात्यायनेनोक्त्ः।
तत्रैव अस्माभिः शोध प्रबन्धेऽस्मिन् विशिष्य विचारः क्रियते। एभिरेव कर्मभिः समस्तं जगत् गतिशीलं वर्तते। सा गतिः निरन्तरं प्रवर्धितव्या इति- कामानया सृष्टेः सन्तुलनाय प्र्वर्धनाय च अस्तीकैः शास्त्रेषु मीमांसा शास्त्रं दुर्गे परिशा रूपं महत्त गभीरं खातं वत्र्तते। अग्रे द्वारि संरक्षणाय सर्वेषां सुख बोधाय अष्टौ व्यकरणानि सन्नद्वानि बद्धपरिकराणि तिष्ठान्ति।
योगशास्त्र-महर्निशं जाग्रितं सुगतानां प्रवेशे काठिन्यमुत्पादयति। सांख्य शास्त्रञ्च नगरे गन्तुं कश्चित् योग्यः वर्तते नवेत्ति विवेचनायां पटुत्वमावहति। तथापि सर्वाण्यपि शास्त्राणि विमुखी कृत्य जैन बौद्धदयः नास्तिकाः वेद विरोधिनः काञ्चन् नगरं प्राविविक्षवः भवन्ति तदा नैयायिकाः विद्वासः कुक्कुरमिव चैरान् धर्तुं पटवः तत्र तिष्ठान्ति वेद शास्त्रंसंरक्षणाय। अतः स विशेषं वक्तुं प्रभवामः यत् वेद रक्षणेन अर्थज्ञानेन सर्वेषां शास्त्राणमुपयोगिता सुतरां सिध्यति। अतः कर्म विज्ञानाय समस्तं वेद शास्त्रमस्माकं लक्ष्यरूपं वर्तते। विदितमेवास्ति यत् नित्य नैमितिक काम्यानां कर्मणाञ्च साम्प्रतिके युगे जनाः अनभिज्ञाः सन्ति केचन मन्त्रज्ञापि मन्त्राणामर्थ ज्ञानाभावात् तेषां प्रयोग विज्ञानमजानन्तः तथा च कर्म कत्र्तुं कारयितुं वा न शक्नुवन्ति।
अतः तेषां मन्त्रज्ञाने सत्यपि स्थाणुवत् फलच्छायानां प्रदान कत्र्तुं न प्रभवन्ति। अतएव मन्त्रार्थानां विविध विज्ञानवन्तः विद्वांसः सर्व कर्म पटुतया कर्तंु प्रभवन्ति तेषां कर्म फलमपि यथाशीघ्रं प्राप्नुवन्ति।
यथोक्तंम-

स्थाणुरयंभारहारः किलाभूत तदधीत्यवेदं न् विजानातियोऽर्थम् योऽर्थज्ञ इत्सकलं भद्रमश्नुते नाकमेतिज्ञान विधूत पाप्मा।।

**सन्दर्भाः**


1. मैत्रीयोयनिषद- 2/5/6/
2. मनुस्मृतिः- 5/235/
3. ऋग्वेद-त्राष्य भूमिका।
4. शुक्लयणुर्वेदीयमन्त्रः।
5. मनुस्मृतिः-1/36/
6. वैदिकवाङ्मयस्येतिहासः।